# न्यायानां प्रसङ्गानुगुणं प्रयोगाः

## केषाञ्चन न्यायानां प्रसङ्गानुगुणं प्रयोगाः

### कूपमण्डूकन्यायः

- कश्चन जनः स्वस्य भाषा एव उत्तमा इति मनुते। सः अन्यभाषाणां साहित्यं संस्कृतिं च न जानाति।
- कश्चन जनः स्वस्य कष्टानि परमकष्टानि इति चिन्तयति। यतः सः अन्येषां कष्टानि न दृष्टवान्।
- कश्चन छात्रः केवलं पाठ्यपुस्तकमेव पठति। अन्येषां ग्रन्थानां पठनं नावश्यकमिति चिन्तयति।

### काकतालीयन्यायः

- कदाचित् विद्युत् न भवति। कश्चन गीतं गायति विद्युत् आगच्छति। तदा सः वदति मम गीतेन एव विद्युत् आगता इति।
- कश्चन मनसि कञ्चित् तर्जयति। तदा एव तस्य आघातः भवति। तर्हि सः चिन्तयति मम तर्जनेन एव आघातः जातः इति।

### गजस्नानन्यायः

- शिक्षकः प्रतिदिनं स्वच्छतायाः महत्त्वं बोधयति। तथापि छात्रः कक्षायाम् अवकरं क्षिपति।
- पितरः आरोग्यरक्षणार्थं Junk food न खादतु इति वदन्ति तथापि केचन सर्वदा तदेव खादन्ति।
- कश्चन कर्मचारी समयपालनस्य प्रतिज्ञां करोति। परन्तु प्रतिदिनं विलम्बेन एव आगच्छति।

### हंसक्षीरन्यायः

- सामाजिकमाध्यमेषु अनेकाः वार्ताः दृश्यन्ते। विवेकवान् छात्रः सत्यतां परीक्ष्य एव तान् स्वीकरोति।
- विपणिषु बहूनि फलानि भवन्ति। जनाः उत्तमानि फलानि परिशील्य स्वीकुर्वन्ति।

© NCERT not to be republished

- जनाः विविधान् परामर्शान् सूचयन्ति। बुद्धिमान् जनः आलोच्य हितकरं परामर्शमेव गृह्णाति।

**सिंहावलोकनन्यायः**

- परीक्षायाः अनन्तरं छात्रः परीक्षाकेन्द्रात् बहिः आगत्य प्रश्नपत्रं पुनः परिशीलयति।
- क्रीडाप्रतियोगितायाः समाप्तौ दलस्य प्रशिक्षकः सम्पूर्णं क्रीडाप्रदर्शनं विश्लेषयति।
- कश्चन छात्रः बहुधा प्रयत्नं करोति परं सफलः न भवति। तर्हि सः किं किं कृतवान् कुत्र दोषाः अभवन् इति सर्वमपि पुनः परिशीलयति।
- कश्चन लेखकः पुस्तकस्य मुद्रणात् पूर्वं सम्पूर्णं लेखं पुनः पठति।

**रज्जुसर्पन्यायः**

- कश्चन जनः रात्रौ स्वस्य छायां दृष्ट्वा भीतः भवति।
- बालः उद्याने दूरात् एकां नलिकां दृष्ट्वा सर्पः इति भीतः भवति। समीपं गत्वा ज्ञातवान् यत् सा केवलं जलनलिका इति।

**बिन्दुबिन्दुनिपातन्यायः**

- एकः छात्रः प्रतिदिनं केवलं पञ्च नूतनानि संस्कृतवाक्यानि जानाति। सः वर्षान्ते सम्यक् संस्कृतेन वक्तुं प्रभविष्यति।
- बालिका प्रतिसप्ताहं किञ्चित् धनं संगृह्णाति। वर्षानन्तरं सा पश्यति कदाचित् तद् धनं अत्यधिकं भवति।
- छात्रः एकस्मिन् विषये प्रतिदिनम् एकघण्टां पठति। सः कतिपयेषु मासेषु तस्मिन् विशिष्टं ज्ञानं प्राप्नोति।
- बालः प्रतिदिनं एकं वृक्षं रोपयति। वर्षान्ते तत् विशालम् उपवनं भवति।

**क्षीरनीरन्यायः**

- न्यायाधीशः उभयपक्षयोः प्रमाणानि सम्यक् परीक्ष्य एव निर्णयं करोति।
- विद्यार्थी अन्तर्जालात् प्राप्तासु सूचनासु सत्यासत्ययोः विवेकं कृत्वा एव परियोजनां लिखति।



© NCERT not to be republished